National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2026;** 1(65): 193-196
© 2026 NJHSR
www.sanskritarticle.com

**Debarati Datta**
Former Student, M.A in Sanskrit,
The University of Burdwan,
West Bengal, India

**Correspondence:**
**Debarati Datta**
Former Student, M.A in Sanskrit,
The University of Burdwan,
West Bengal, India

# वर्तमानकाले मानवाणां दुःखनिवारणे सांख्यदर्शनस्य प्रासङ्गिकताच

**Debarati Datta**

**Abstract–** वेदः विश्वस्य प्राचीनतमः ग्रन्थोऽस्ति। वेदात् भारतीयदर्शनस्य उत्पत्तिः भवति। परन्तु वेदः दर्शनग्रन्थः इति वक्तुं न शक्यते। संगीतमयमन्त्राणां संकलनं हि वेदः। अस्मिन् मन्त्रे बहवः दार्शनिकाः विचाराः निहिताः सन्ति। वर्तमाने वैज्ञानिकयुगे मानवाः दर्शनं व्यर्थम् इति मन्यन्ते। किन्तु दर्शनं मानवजीवनस्य व्यक्तिगतं सामाजिकञ्च उभयमपि प्रभावयति। आधुनिक-अस्तित्ववादिदर्शनं मानवजीवनस्य अनुभूतिः, आशा, निराशा इत्यादिषु भावनासु प्राधान्यं दत्तवत्। पुनः अरस्तु आधुनिकयुगस्य फलवादः (Pragmatism) सत्यस्य व्यवहारिकमूल्ये प्राधान्यं ददाति। अतएव मानवजीवनस्य दर्शनेन सह घनिष्ठसम्पर्कः अस्ति। मानवाः जीवने न्यायं विना जीवितुं न शक्नुवन्ति। प्रतिदिनं मानवाः भिन्न-भिन्न-समस्यानां सम्मुखिनः भवन्ति। अतः मानवाः दुःखं प्राप्नुवन्ति। सर्वे मानवाः दुःखात् मुक्तिं लभन्ते। अतः दुःखात् चिरमुक्तिमार्गः दर्शनस्य एका प्राचीनतमा शाखा सांख्यदर्शने उल्लिखिता। अनेन शोधपत्रेण वर्तमानकाले भारतीयः युवसमाजस्य सम्बन्धे दर्शनस्य तात्पर्यम् उल्लिखितमस्ति।

**Keywords–** भारतीयदर्शनम्, सांख्यदर्शनम्, दुःखम्, युवसमाजः, मोक्षः।

**Introduction–** दृश् +अनट् प्रत्ययनिष्पन्नः दर्शनशब्दः। अत्र दर्शनपदेन अन्तदर्शनम्, तत्त्वदर्शनम् बोध्यते न तु चाक्षुषदर्शनम्। भारतीयदर्शनम् आस्तिकनास्तिकभेदेन द्विविधम्। तत्र आस्तिकदर्शनं षड्विधम्- सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा इति। नास्तिकदर्शनं त्रिविधम्- चार्वाकः, जैनः, बौद्धश्चेति। एषु षड्विधेषु आस्तिकदर्शनेषु सांख्यदर्शनं प्राचीनतमम्। आदिविद्वान् परमऋषिः महर्षिकपिलमुनिः सांख्यदर्शनस्य प्रणेता अस्ति। तथापि कपिलमुनिविरचितं'सांख्यसूत्रम्' अधुना लुप्तम् अभवत्। कपिलमुनिः सांख्यशास्त्रप्रतिपादितं तत्त्वज्ञानं तस्य शिष्याय आसुरये दत्तवान्। आसुरीतः पञ्चशिखः, पञ्चशिखात् ईश्वरकृष्णश्च एतत् ज्ञानं प्राप्तवान्। अस्मिन् प्रसङ्गे सांख्यकारिकायाम् ईश्वरकृष्णेन उक्तम्-

**"एतत् पवित्रमग्रं मुनिरासुरयेऽनुकम्पया प्रददौ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्।।"**[1]

जीवनं सुखदुःखयोः परिणामः अस्ति। परन्तु मानवस्य जीवने सुखात् दुःखस्य स्तरः अधिकः भवति। अतः महर्षिकपिलमुनिः सांख्यदर्शने दुःखनिवारणस्य मार्गं वर्णयति। तस्य मतानुसारं दुःखं त्रिविधम्- आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति। एतेषां त्रिविधदुःखानां परमनिवृत्तिरेव मोक्षः। 'मुच्यतेसर्वदुःखबन्धनैर्यत्र सः मोक्षः।' मुच् धातुनिष्पन्नः मुक्तिः शब्दः। पाणिनिमते 'मुक्ति'शब्दस्य अर्थो हि मोक्षणः, पुनः गीतायां पापमुक्तेः, कर्मबन्धनात् मुक्तेः उल्लेखः अस्ति। महाभारते उक्ताया वासनायाः निवृत्तिरेव मोक्षः।

भारतीयदर्शने 'मुक्तिः' इति शब्दः भिन्न-भिन्न-सम्प्रदाये भिन्ननाम्ना अभिहितः। यथा- मोक्षः, निर्वाणः, अपवर्गः, कैवल्यम्, निःश्रेयसः इत्यादि।

<u>उद्देश्यः</u> – 1. सांख्यदर्शनस्य सूक्ष्मविचारेण मानवस्य दुःखनिवारणम्।

2.सांख्यदर्शनस्य सूक्ष्मविचारेण युवसमाजस्य चिन्ताधारायां परिवर्तनम्।

सम्-ख्या+अण् प्रत्ययनिष्पन्नः सांख्यशब्दः। सम्यक् ज्ञानम् इति सांख्यम्। अत्र सम्यक् ज्ञानम् इति पदेन विवेकज्ञानं बोध्यते। प्रकृतेः पुरुषस्य भेदज्ञानं हि विवेकज्ञानम्। सांख्यदर्शनम् द्वैतवादिदर्शनम्। अस्य दर्शनस्य द्वौ मूलतत्त्वौ स्तः पुरुषः प्रकृतिश्च। वयं यः संसारः इति मन्यामहे, तत् वस्तुतः प्रकृतिपुरुषयोः संयोग एव। सांख्यकारिका-नुसारं पुरुषस्य मुक्तेः कृते प्रकृतेः च दर्शनाय भोगाय वा पङ्ग्वन्धयोरिव उभयोरपि संयोगात् जगतः सृष्टिः भवति।

**"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।"**[2]

अस्मिन् संसारस्य बन्धने आबद्धा मानवाः दुःखेन परिवृताः। अद्य एकविंशतितमे शतके अपि जनाः दुःखेन परिपूर्णाः सन्ति। वर्तमानकाले विशेषत युवसमाजः दुःखसमुद्रे निमग्नः भवति, यतः यूनां मध्ये लोभः, मोहः, आत्मिकम् आवश्यकताः च वर्धन्ते। सांख्यदर्शने इदम् आध्यात्मिकं दुःखम् इति नाम्ना अभिहितम्। **"तत्राध्यात्मिकं द्विविधम्- शरीरं मानसं च। मानसं काम-क्रोध-लोभ-मोह-भयेर्ष्या-विषाद-विषयविशेषादर्शननिबन्धनम्।"**[3]

भूतजातं कीटदंशानादिकम् आधिभौतिकं दुःखम्। इदं दुःखं वस्तुगतम्। प्राणिज-उद्भिदज-अण्डज-स्वेदजश्च इति चतुर्भ्यः प्राणिवर्गेभ्यः उत्पन्नं दुःखम् आधिभौतिकं दुःखम्।

**"तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्।"**[4]

दैवजातं झञ्झाप्लावनादिकम् आधिदैविकं दुःखम्। मनुष्यस्य इच्छायाः अभावात् या चिन्ता, व्याकुलता, व्याग्रता जायते तत् हि आधिदैविकं दुःखम्।

**"आधिदैविकं तु यक्षराक्षसविनायकग्रहाद्यावेशनिवन्धनम्।"**[5]

मानवस्य व्यवहारः तस्य परिचयः अस्ति। मानवस्य व्यवहारः जैविक-मनोवैज्ञानिकप्रकृतेः उपरि निर्बिभर्ति। अतः मनोवैज्ञानिका-चरणस्य मूल-उपादानमेव त्रिगुणम्। आयुर्वेदः प्रथमं त्रिगुणं व्याख्यायते। सांख्यदर्शने अपि गुणत्रयस्य व्याख्यानमस्ति। अधुना प्रश्नः उत्पद्यते के ते त्रयो गुणाः? सत्त्वं, रजः तमस्- इति गुणत्रयम्। अत्र गुणाः इति पदार्थाः। 'पर' शब्देन पुरुषः बोध्यते। सांख्यशास्त्रे पुरुषस्य उपकारकं सत्त्वं रजो तमः इति त्रयो गुणाः उच्यन्ते। अतः गुणत्रयस्य धर्मप्रसङ्गे सांख्यकारिकायाम् ईश्वरकृष्णेन उक्तम्-

**"प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृतिनियमार्थाः।**

**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।"**[6]

प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः। अप्रीतिः दुःखम्, अप्रीत्यात्मको रजोगुणः। विषादो-मोहः, विषादात्मकस्तमोगुणः इत्यर्थः।

पुनः गुणत्रयस्य लक्षणप्रसङ्गे ईश्वरकृष्णेन सांख्यकारिकायाम् उक्तम्-

**"सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**

**गुरु वरणकमेव तमः, प्रदीपवच्चाऽर्थतो वृत्तिः।।"**[7]

सत्त्वं लघु प्रकाशकमिति। सत्त्वं गुणः सुखेन ज्ञानेन च आत्मानं बध्नाति। मानवस्य चरित्रनिर्माणे अस्य मुख्य-भूमिका अस्ति। सात्त्विकः व्यक्तिः जीवने सम्यक् सिद्धान्तग्रहणे समर्थः।

गुरुवरणकमेव तमः। तमो आवरणशक्तिरूपम्। तमो गुणः प्रमादेन आलस्येन निद्रयाच आत्मनं बध्नाति।

चलञ्च रजः। रजोगुणं चलनात्पूर्वम्। रजो गुणः कामव्यसनाभ्याम् उत्पद्यते। अयं गुणः कर्माकर्मणि आसक्तिना आत्मानं बध्नाति। रजोगुणस्य स्वरूपप्रसङ्गे गीतायाम् उक्तम्-

**"रजोरागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**

**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।।"**[8]

रजोगुणात् उत्पन्नः कामः मानवस्य तादृशः शत्रु यः कदापि केनचित् कारणेन सन्तुष्टः न भवति।

**'न जातु कामः कामनामुपभोगेन शाम्यति।'**[9]

यथा धूमेन वह्निः आवृतो भवति, तथैव कामेन मानवस्य विवेकमावृतं भवति। कामेन मानवस्य सात्त्विकज्ञानमपि धूमेन बह्नेः इव आवृतं भवति। यदि कामः वर्धते तर्हि पारमार्थिकमार्गः अन्धकाराच्छन्नं भवति। अतः कामः एव जीवस्य बन्धनस्य कारणमस्ति।

**'एतैर्विमोहयत्येव ज्ञानमावृत्य देहिनम्।'**[10]

यौवनकाले मानवस्य बुद्धिः रजोगुणेन कलुषिता भवति। एतत् वाणभट्टविरचितस्य 'कादम्बरी' इति ग्रन्थेऽपि उल्लिखितम् अस्ति। "यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूणां दृष्टिः।"

अतः वर्तमानकाले यूनां धैर्यम् अत्यन्तं क्षीणं भवति। अल्पकाले अत्याधिक-प्रत्याशा तेषां राजसिकवृत्तिं प्रवर्धयति। अतः ते दुःखस्य वशवर्तिनः सन्तः समस्यापूर्णकार्यं प्रति अग्रेसरन्ति।

वाचस्पतिमिश्रस्य मते 'दुःखं रजः परिणामभेदो'। अतः मानवजीवने सत्त्वं रजः तमस्- इति गुणत्रयस्य समताविधानं प्रयोजनीयम्। अस्मिन् प्रसङ्गे सांख्यकारिकायाम् उक्तम्- 'प्रदीपवच्चाऽर्थतो वृत्तिः'।

भारतीयदर्शने कार्यकारणविषये द्वौ प्रधानसिद्धान्तौ स्तः- सत्कार्यवादासत्कार्यवादश्च। सांख्यदर्शने सत्कार्यवादः स्वीकृतम्। सत्कार्यवादानुसारं कार्यं सत् अर्थात् उत्पत्तेः पूर्वं कार्यं कारणे सद्रूपे विराजते। सत्-वस्तुभ्यः सत्-वस्तूनां उत्पत्तिर्जायते। 'सतः सत् जायते।' किन्तु सांख्यशास्त्रानुसारं न उत्पद्यते न विनश्यति द्रव्यम्। सैव उत्पत्तिः अव्याक्तावस्थायाः व्याक्तावस्था प्राप्तिः। तथा व्याक्तावस्थायाः अव्याक्तावस्था प्राप्ति हि विनाशः। कारणं कार्यस्य अव्यक्तावस्था। तथा कार्यं कारणस्य परिणामस्ति। कार्यं न हि नवोत्पत्तिः। सांख्यशास्त्रानुसारम् उत्पत्तेः पूर्वं कार्यं सत् तथा विनाशानन्तरमपि कार्यं सत्। असतः उत्पत्तिः न भवति, सतःअपि विनाशः न जायते। अस्मिन् प्रसङ्गे गीतायाम् उक्तम्-

**'नासतो विद्यते भावः नाभावो विद्यते सतः।'**[11]

सत्कार्यवादः सापेक्षे सांख्यकारिकायाम् ईश्वरकृष्णाचार्येण उक्तम्-

**"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**

**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।"**[12]

वर्तमानकाले अस्य तात्पर्यमस्ति यत् यूनाम् आभ्यन्तरस्थितां सुप्तप्रतिभाम् उपर्युक्ते परिवेशे प्रकाशयितुम्।

प्रकृतिपुरुषयोः भेदज्ञानं हि सांख्यदर्शनस्य मूलविषयः। अनेन तत्त्वज्ञानेन यूनाम् अन्तस्थितस्य सत्यस्य नवोन्मेषः जायते। येन ते आत्मानुसन्धाने प्रवृत्ताः भवन्ति।

सांख्यदर्शनानुसारं पुरुषः कदापि बन्धनेन आबद्धो न भवेत्। प्रकृतिः स्वयं सप्तभिः रूपैः स्वयमेव बध्नाति। अतः पुरुषार्थसिद्धये प्रकृतिः ज्ञानेन स्वयमेव मुक्तं करोति।

**"रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।**

**सैव च पुरुषार्थम्प्रति विमोचयत्येकरुपेण।।"**[13]

अतः युवसम्प्रदायः युक्ति-आवेगयोः भेदं बुध्यते। ते 'पुरुष' इति विषये ज्ञानं लभन्ते। अनेन ज्ञानेन स्वयं समस्यायां समाधानं करिष्यन्ति।

वस्तुतः लोभ-मोहः, माया, अहंकारः इत्यादिषु अज्ञानवशात् अस्माकं शरीरे उत्पद्यते। शरीरस्य दुःखं मानवाः स्वयमेव दुःखं मन्यन्ते। सांख्यानां मते दुःखस्य मूलकारणम् अज्ञानम् अविद्या वा। अविद्या विपर्ययः इति नाम्ना अभिहिता। 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्' (योगदर्शनम्)। प्रकृतिपुरुषयोः अभेदज्ञानं हि अविद्या। सांख्यदर्शने स्वीकृतं पञ्चविंशतितत्त्वज्ञानं निरन्तरेन योगाभ्यासेन उत्पन्नात् विवेकज्ञानात् पुरुषः स्वरूपे स्थितः भवति। इयं हि पुरुषस्य मुक्तदशा। पुरुषम् आत्मस्वरूपं सन्दर्श्य प्रकृतिः निवृत्ता भवति। पुरुषस्य विवेकज्ञानं हि अपवर्गः। आत्मज्ञानप्राप्तस्य मानवस्य कोपि शोकमोहादयो न जायन्ते। एतस्मिन् प्रसङ्गे ईशोपनिषदि उक्तम्-

**"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।"**[14]

विवेकज्ञानलब्धस्य मानवस्य इह जन्मनि पूर्वजन्मनि च सम्पादितानि सञ्चितानि सर्वाणि कर्माणि ज्ञानाग्नौ भस्मीभूतानि भवन्ति। फले लोके कृतं कर्म अपि तस्य कृते बन्धनहीनं भवति।

**"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन।**

**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।।"**[15]

आत्मज्ञानप्राप्तं मानवः पूर्वजन्मसंस्कारस्य कारणे सः कुम्भकारेण निर्मितं भ्रमणचक्रवत् जीवनं धारयति। सांख्यकारिकायाम् उक्तम्-

**"सम्यग् ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ।**

**तिष्ठति संस्कारवशात् चक्रभ्रमिवद्धृतशरीरः।।"**[16]

अतः शरीरस्य विनाशानन्तरं भोगापवर्गयोः पूर्वात् चरितार्थाय प्रकृतिः निवृत्ता भवति। अतः पुरुषः 'ऐकान्तिकम्'- अवश्यम्भावि, 'आत्यन्तिकम्'- अविनाशि इत्युभयं मुक्तिं प्राप्नोति। अतः ऐकान्तिकमात्यन्तिकमुभयं दुःखं निवृत्ति हि कैवल्यम्।

**"प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।**

**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति।।"**[17]

**<u>नास्तिकदर्शनानुसारं दुःखम्-</u>**

'नास्ती' ति बुद्धिर्यस्य स नास्तिकः। भारतीयदर्शने चार्वाकदर्शनम् , जैनदर्शनम्, बौद्धदर्शनञ्चेति नास्तिकदर्शनानि। चार्वाकरदर्शनम् अतिरिच्य सर्वेषां दर्शनानां मतानुसारं जगत् दुःखेन परिपूर्णम् इति। अद्यत्वे प्राय २६०० वर्षपूर्वम् राजपुत्रः सिद्धार्थो गौतमो वा केवलम् उनविंशतितमे वर्षे दुःखस्य अनुसन्धानाय अभिनिष्क्रान्तवान्। अतः बोधिवृक्षतले बोधिज्ञानं प्राप्तं सः वुद्धदेव इति नाम्ना अभिहितः। तस्य प्रचारित धर्म वौद्धधर्म, दर्शनं वौद्धदर्शनम् इति ख्यातः। त्रिपिटकं वौद्धधर्मस्य मुख्यग्रन्थः। भगवतः वुद्धस्य उपदेशानि पिटकत्रये विन्यस्तम्। सूत्तपिटक-विनयपिटक-अभिधर्मपिटकम् इति त्रिपिटकम्। गयायां वोधिवृक्षतले ध्यानयोगेन भगवता वुद्धेन यत् सत्यज्ञानं लब्धं तत् हि आर्यसत्यचतुष्टयस्य ज्ञानम्। आर्यसत्यं चतुर्विधम्-

1. **दुःखम्-** भगवतः वुद्धस्य दार्शनिकाधारं दुःखम्। दुःखं सत्। तस्य मते सर्वं दुःखम्, क्षणिकम्, अनित्यमञ्च इति।
2. **दुःखसमुदायः-** दुःखानां कारणमस्ति। सर्वं जागतिकवस्तूनां कार्यकारणसम्पर्कः विद्यते। बौद्धदर्शने कार्यकारणतत्त्वं प्रतीत्यसमुत्पादवादः इति ख्यातः। दुःखस्य कारणनिर्णये भगवता बुद्धेन द्वादशनिदानम् तथा भवचक्रम् उक्तम्।
3. **दुःखनिरोधः-** वुद्धस्य मतानुसारे दुःखानां निवारणं सम्भवम्।
4. **दुःखनिरोधमार्गः-** जीवानां दुःखनिवृत्तये यच्च परमज्ञानं वुद्धेन दृष्टम् तेषु आर्यसत्यचतुष्टयेषु अष्टाङ्गिकमार्गः अन्तिममार्गः। अनेन मार्गेन जीवः दुःखात् परित्रातुं समर्थः। सम्यक् दृष्टिः, सम्यक् सङ्कल्पः, सम्यक् वाक्, सम्यक् कर्मान्तः, सम्यक् आजीवम्, सम्यक् व्यायम्, सम्यक् स्मृतिः सम्यक् समाधिश्च इति अष्टाङ्गिकमार्गः। वौद्धदर्शनानुसारं दुःखस्य आत्यन्तिक निवृत्ति हि निर्वाणः।

हीनयान-महायानश्चेति बौद्धदर्शनस्य शाखाद्वयम्। हीनयान-महायानसम्प्रदाययोर्मध्ये निर्वाण-विषये विवादः परिलक्षितः। हीनयानसम्प्रदायः केवलं स्वयं निर्वाणप्राप्तिं स्वीकरोति तथा न केवलं स्वयम्, अपि तु सर्वेषां जीवानां निर्वाणप्राप्तिं स्वीकरोति महायानसम्प्रदायः।

जिन्+अण्= जैनः प्रत्ययनिष्पन्नः जैनः शब्दः। जितेन्द्रियः इत्यर्थः। चतुर्विंशतेः तीर्थङ्कराणां प्रथमः ऋषभदेवः, अन्तिमः तीर्थङ्करः महावीरः वर्धमानः आसीत्। जैनदर्शनं कर्मफलं स्वीकरोति। कर्मफलेन जनाः विविधानि सुखदुःखानि अनुभवन्ति, तद्धि बन्धनम्। जैनानां मतानुसारं-

**'आस्रवो भवहेतुः स्यात् संवरमोक्षकारणम्।'**[18]

अर्थात् बन्धनस्य कारणं हि आस्रवः। मुक्तेः कारणं हि संवरः। भोगवासनादीनां त्यागात् पुद्गलात् विच्छिन्नता हि मुक्तिः। अत्र आजीवस्य तथा जडस्य विभागविशेषः हि पुद्गलः। जैनदर्शने मुक्तिसाधनविषये उक्तम्-

**'सम्यग्दर्शनज्ञानचरित्राणि मोक्षमार्गः।'**[19]

सम्यक् दर्शनम्, सम्यक् ज्ञानम्, सम्यक् चरित्रम् जैननां त्रिरत्नम्। पञ्चमहाव्रतेन सम्यक् चरित्रं निर्मितम्। अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यम्, अपरिग्रहश्चेति पञ्चमहाव्रतम्। जैनमतानुसारं यदि मुक्तः पुरुषः सक्रियं जीवनधारनं करोति तथापि सः कर्मेण कलुषितः न भवति। अतः जैनदर्शने मोक्षप्राप्तः पुरुषः 'आर्हत्' इति नाम्ना अभिहितः।

आस्तिकः वा नास्तिकः वा, आध्यात्मवादी वा यथार्थवादी वा, प्राचीन वा समकालीन वा सर्वेषां मतानुसारं दुःखस्य मूलकारणम् अज्ञानम् अविद्या वा। अज्ञानम् अविद्या वा विनाशेन जीवस्य

मोक्षप्राप्तिं सम्भवम्। मोक्षप्राप्त्यवस्थायां जीवस्य सर्वाणि दुःखबन्धनानि विनष्टानि भवन्ति। अविद्यया जनाः बन्धग्रस्तं भवन्ति परन्तु विद्यया जनाः तावत् मुक्ता भवन्ति। 'सा विद्या या विमुक्तये।' अस्मिन् प्रसङ्गे ईशोपनिषदि उक्तम्- यस्य विद्याविद्ययोः उभयमपि ज्ञानं विद्यते, सः अविद्यया मृत्युरतिक्रान्तोभवति, परन्तु विद्यया देवताचिन्तया वा अमृतत्वलाभो भवति।

**"विद्यां चाविद्याञ्च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।"** [20]

<u>उपसंहारः</u>**-** वर्तमानस्य युवसम्प्रदायः भविष्यतस्य दिशास्ति। "The youth of today are the leader so tomorrow" (Nelson Mandela). अस्माकं भारतवर्षं युवादेशेषु अन्यतममस्ति। सम्प्रति गणनानुसारं भारतवर्षे 65% युवानः सन्ति। अस्माकं देशे जानवरी मासस्य १२ दिनाङ्के राष्ट्रीययुवादिवसः इति पालनीयम्। स्वामीविवेकानन्दस्य मते युवासमुदायः सर्वान् समस्यान् सिंहवत् सम्मुखीभवितुं समर्थः अस्ति। "My faith is in the younger generation, the modern generation they will work out the whole problem like lions, (Swami Vivekananda)." अयं युवसम्प्रदायः राष्ट्रस्य मुख्यशक्तिः अस्ति। "The ignited minds of the youth of India are the most powerful resource any nation can ask for" (APJ Abdul Kalam). केवलं युवसम्प्रदायेन राष्ट्रस्य परिवर्तनं सम्भवति। "A youth is capable of bringing the things together and changing the direction too. They can come together and bring changes. There is no no need of breaking anything, but need to bring changes" (P.M). एतत् परिवर्तनाय युवानां मध्ये आत्मशक्तिः निर्भिकता आध्यात्मिकं चेतनायाः जागरणम् आवश्यकमेव। सांख्यदर्शनस्य ज्ञानं तेषां चिन्ताधारायां परिवर्तनम् आनेष्यति। येन अस्माकं भारतवर्षः विश्वगुरुः भविष्यति। अतः वचनमिदं यथार्थं भविष्यति-

**"यथासमुद्रो भगवान् यथा मेरु महेन्द्रगिरिः।**
**उभौख्यातौ महानिधी तथा भारतमुच्यते।।"**[21]

**Bibliography:**


1. अरविन्द, श्री। उपनिषदावली, श्रीअरविन्द आश्रम प्रकाशन, पाण्डिचेरी, पुनर्मुद्रण १९८४।
2. प्रभुपाद, ए. सी. भक्तिवेदान्तस्वामी। श्रीमद्भगवद्गीता यथारूप, भक्तिवेदान्त बुक ट्रास्ट, पुनर्मुद्रण २००७।
3. गोस्वामी, नारायणचन्द्रः। सांख्यतत्त्वकौमुदी, संस्कृत पुस्तक भाण्डार, कलकाता, २०१६।
4. मण्डल, सुजित। "चार्वाक, बौद्ध ओ जैन दर्शनेर प्रेक्षिते मुक्ति"। Pratidhwani the Echo, Vol. VII, July 2018।
5. मनिरुल, शेख। "सांख्यकारिकार आलोके मुक्तिर धारणा: एकटि अन्वेषण"। Trisangam International Refereed Journal, Vol. V, Oct 2025।
6. Bhuskute, Dr. Amruta, Peshwe and Deshpande, Sayali. "Manifestation of Triguna in Human Behavior: Sankhya to Psychology". Shodhsamhita, Vol. VIII, Kavikulaguru Kalidas Sanskrit University, Ramtek.
7. श्रीवास्तव, डाँ महेशकुमार। कादम्बरी - शुकनासोपदेशः। विश्वविद्यालय प्रकाशन, वाराणसी, २०१७।


**संदर्भ ग्रंथ**


1. सांख्यकारिका-७०
2. सांख्यकारिका-२१
3. ख्षतत्त्वकौमुदी - १०
4. सांख्यतत्तवकौमुदी - ११
5. सांख्यतत्वकौमुदी - ११
6. सांख्यकारिका १२
7. सांख्यकारिका-१३
8. श्रीमद्भगवद्गीता – १४/७
9. भगवतपुराण – ९.१९.१४, मनुस्मृति २/९४
10. श्रीमद्भगवद्गीता – ३/४०
11. श्रामद्भगवद्गीता – २/१६
12. सांख्यकारिका-९
13. सांख्यकारिका- ६३
14. ईशोपनिषद्-७
15. गीता-ज्ञानयोग-३७
16. सांख्यकारिका-६७
17. सांख्यकारिका-६८
18. वीतराग स्तोत्र
19. तत्तवार्थ सूत्र
20. ईशोपनिषद्-१२
21. महाभारत भीष्मपर्व – ६/१